## भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्। (१६/३४४३)

कृत्यार्थे इति निवृत्तम्। तुमर्थे [1]इति वर्तते। प्रकृत्यर्थविशेषणं [2]भावलक्षणग्रहणम्। भावो लक्ष्यते येन[3] तस्मिन्नर्थे वर्तमानेभ्यः स्थादिभ्यो धातुभ्यः छन्दसि विषये तुमर्थे तोसुन् प्रत्ययो भवति। 'आसंस्थातोर्वेद्यां[4] शेरते' (काठ. सं. ११.६)। [5]आ समाप्तेः सीदन्ति इत्यर्थः। इण्–पुरा सूर्यस्योदेतोराधेयः' (काठ. सं. ८.३)। कृञ्–'पुरा वत्सानामपाकर्तोः'[6] (काठ. सं. ३१. १५)। [वदि–[7]पुरा प्रवदितोरग्नौ प्रहोतव्यम्। चरि–'पुरा प्रचरितोराग्नीध्रीये[8] होतव्यम्' (गो. ब्रा. २. २. १०)। हु–'आहोतोरप्रमत्तस्तिष्ठति' (तै. ब्रा॰ १.४.९.५)। तमि–'आ तमितोरा[8]सीत' (तै. ब्रा. १.६.९.५)। जनि–'काममा विजनितोः सम्भवामेति' (तै. सं. २.५.१.५) इति॥

## सृपितृदोः कसुन्। (१७/३४४४)

भावलक्षणे छन्दसि इति वर्तते। सृपितृदोर्धात्वोः भावलक्षणे[9]ऽर्थे वर्तमानयोः छन्दसि विषये तुमर्थे कसुन् प्रत्ययो भवति। 'पुरा क्रूरस्य विसृपो विरप्शिन्' (तै. सं. १.१.९.३)। 'पुरा जत्रुभ्य [10]आतृदः' (ऋ. ८.१.१२)॥

## अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा। (१८/३३१६)

छन्दसि भावलक्षणे इति [11]सर्वं निवृत्तम्। अलम् खलु इत्येतयोः [12]प्रतिषेधवाचिनोरुपपदयोः [13]धातोः क्त्वा प्रत्ययो भवति प्राचामाचार्याणां मतेन। अलं कृत्वा। खलु कृत्वा। अलं बाले रुदित्वा। अलंखल्वोः इति किम्? मा कार्षीः। प्रतिषेधयोः इति किम्? अलङ्कारः। प्राचांग्रहणं [14]विकल्पार्थम्। अलं रोदनेन। [15]वासरूपविधिश्चेत् पूजार्थम्॥

## उदीचां माङो व्यतीहारे। (१९/३३१७)

क्त्वा [16]तु वर्तते। माङो धातोः व्यतीहारे[17] वर्तमानादुदीचामाचार्याणां मतेन क्त्वा प्रत्ययो भवति। [18]अपमित्य याचते। अपमित्य हरति। [19]अपूर्वकालत्वाद[20]प्राप्तः क्त्वा विधीयते। उदीचांग्रहणात्तु[21] यथा–प्राप्तमपि भवति। याचित्वाऽपमयते। [22]हृत्वाऽपमयते। मेङः कृतात्वस्यायं निर्देशः [23]कृतो ज्ञापनार्थः, 'नानुबन्धकृतमनेजन्तत्वम्' (शा. प. १५) [24]इति। तेन 'दाधा घ्वदाप्' (१.१.२०/२३७३) इति दैपोऽपि प्रतिषेधो भवति॥

---

1. छन्दसि च इत्यधिकं फ. ह. 2. एतत् फ. 3. तद्भावलक्षणं इत्यधिकम् फ. 4. विद्यां फ, सीदन्ति इति मुद्रितम्. 5. आसंस्थानात् फ. ह. 6. आस्ते इत्यधिकम् अ. 7. पुरा वाचः प्रवदितोः (मै. 4.5.3) 8. उपतिष्ठते अ, तिष्ठते क. फ, तिष्ठति ह. 9. अर्थे नास्ति ह. 10. आदृतः ह. 11. सर्वं नास्ति फ. ह, इति च निवृत्तम् ब. 12. प्रतिषेधार्थयोः क. 13. धातोः नास्ति ब. 14. विवक्षार्थम् ब. 15. वासरूपः इति ह. 16. अनुवर्तते फ. ह. 17. अर्थे इत्यधिकम् ह. 18. अपमाय याचते क. 19. अपूर्वकालत्वाद्–अपमयते नास्ति अ. 20. न प्राप्तः ह. 21. च ब. 22. हृत्वा नास्ति फ. 23. कृतः नास्ति फ. 24. भवति अ. फ. ह.